# व्याकरणाध्ययनस्य प्रयोजनम्

**माधव प्रसाद जोशी**
**वरिष्ठानुसन्धाता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**
madhav.joshi1994@gmail.com

## सारांशः

भाषायाः माध्यमेन एव वयं सर्वविधस्य जागतिकस्य ज्ञानस्य व्यवहारस्य च सम्पादनं कुर्मः। तथा च भाषायां व्याकरणस्य नियमनं भवति। अतः भाषायाः शुद्धं स्वरूपं अवगन्तुं व्यकारणज्ञानम् आवश्यकम्। व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक् क्रियन्ते इति व्याकरणम्। साधुशब्दानां ज्ञानम् एव व्याकरणाध्यनस्य प्रयोजनम् अस्ति। पतञ्जलिविरचिते व्याकरणमहाभाष्ये **रक्षोहागमलघ्वसन्देहाः** इति व्याकरणाध्ययनस्य प्रयोजनानि उक्तानि। तान्येव अत्र अस्मिन् लेखे विव्रियन्ते।

## प्रस्तावना

भाषायाः माध्यमेन वयम् अस्माकं हृद्गतान् भवान् प्रकटयामः। लोकस्य सर्वविधः अपि व्यवहारः भाषया एव सम्भवति तथा च शब्दाभावे इदं जगत् अन्धकारम् इव प्रतीयेत। उक्तञ्चापि आचार्येण दण्डिना -

**'वाचामेव प्रसादेन लोकयात्रा प्रवर्तते'।**
**'इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते'।**[1]

अर्थात् वाण्याः प्रसादेन एव अस्य जगतः यात्रा जायते। यदि इदं शब्दरूपि ज्योतिः अस्मिन् संसारे न प्रज्वलेत् तर्हि समग्रम् अपि भुवनत्रयम् अन्धकारमयम् एव स्यात् इति।

शुद्धानां परिष्कृतानां साधुशब्दानां ज्ञानं च व्याकरणेन भवति। वि आङ् इति उपसर्गपूर्वकात् 'कृ'धातोः करणे अर्थे 'ल्युट्'प्रत्ययेन व्याकरण-शब्दस्य व्युत्पत्तिः भवति। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम् इत्यर्थः। इदं च व्याकरणं नवविधम् अस्ति इति अनुमीयते यथा –

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥**

क्वचित् व्याकरणस्य अष्टविधत्वम् अपि स्वीक्रियते। तद्यथा भविष्यपुराणे ब्राह्मे पर्वणि प्रथमाध्याये –

**प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।**
**याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।**
**सावित्रं तथा प्रोक्तमष्टमं वैष्णवं तथा॥ इति।**[2]

सर्वेष्वपि व्याकरणेषु पाणिनीयतन्त्रस्यैव प्रसिद्धिः अस्ति। लौकिकवैदिकोभय-प्रक्रियालङ्कृतत्वात् च अस्य एव वेदाङ्गत्वं स्वीक्रियते। पाणिनीयं व्याकरणम् अष्टभिरध्यायैर्गुम्फितत्वात् अष्टाध्यायी इति पदेन अपि उच्यते। अष्टाध्याय्याः व्याख्या एव महाभाष्य-पदेन उच्यते। महाभाष्यकारः भगवान् पतञ्जलिः ग्रन्थस्य आरम्भम् अथ शब्दानुशासनम् इत्यनेन करोति। अनेन व्याकरणशास्त्रस्य साक्षात् प्रयोजनं कथितं भवति। केषां शब्दानाम् इति जिज्ञासायाम् उच्यते – **लौकिकानां वैदिकानां च शब्दानाम् इति।** अर्थात् लौकिकशब्दानां वैदिकशब्दानां च अनुशासनं क्रियते इत्यर्थः। **कानि पुनः शब्दानुशासनस्य प्रयोजनानि ?** इति जिज्ञासाम् उत्पादयति भाष्यकारः। अस्यां जिज्ञासायां सः पञ्च मुख्यानि प्रयोजनानि त्रयोदश च अन्यानि प्रयोजनानि कथयति। तानि क्रमशः वर्ण्यन्ते –

---
[1] काव्यादर्शः
[2] भविष्यपुराणम् १/१/५९६०

**रक्षोहागमलघ्वसन्देहाः प्रयोजनम्** । रक्षा, ऊहः, आगमः, अलघुः, असन्देहः इति व्याकरणाध्ययनस्य प्रयोजनम् अस्ति –

**रक्षा**

**रक्षार्थं वेदानां अध्येयं व्याकरणम्** । वेदानां रक्षार्थं व्याकरणस्य अध्ययनं करणीयम् । यतः सः एव सम्यक्तया वेदानां परिपालनं कर्तुं शक्नोति यः लोप-आगम-वर्णविकारान् जानाति । अतः वेदानां सम्यक्तया रक्षणार्थं व्याकरणस्य अध्ययनं करणीयम् इति ।

**ऊहः**

**ऊहः खल्वपि । न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्राः निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान् नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।** मीमांसकैः ऊहस्य लक्षणम् एवं क्रियते - **ऊहः नाम प्रकृतौ अन्यथा दृष्टस्य विकृतावन्यथाभावः** इति । अर्थात् प्रकृतौ यः अंशः अन्यरूपेण दृष्टः तस्य एव विकृतौ अन्यथाभावः ऊहः इति उच्यते । वेदे प्रकृतियागगतमन्त्राणाम् एव यथावत् पाठः अस्ति । विकृतियागेषु **प्रकृतिवद् विकृतिः कर्तव्या** इति अतिदेशेण विकृतियागे प्रकृतियागस्य मन्त्राः प्राप्ताः भवन्ति । तत्र मन्त्रेषु प्रकृतिगतानां द्रव्यदेवतानां स्थाने विकृतिगतद्रव्यदेवानाम् उच्चारणं करणीयं भवति । तथा च तदनुसारेण विभक्तिलिङ्गानां परिवर्तनं च करणीयं भवति । अत एव उक्तं वेदे मन्त्राः सर्वलिङ्गयुक्ताः सर्वविभक्तियुक्ताः च न पठिताः सन्ति । यज्ञकर्त्रा यज्ञानुसारेण तेषु मन्त्रेषु यथायथं विपरिणामः करणीयः । तच्च वैयाकरणः एव कर्तुं समर्थः न तु अवैयाकरणः इति तस्माद् व्याकरणम् अध्येतव्यम् ।

**आगमः**

**आगमः खल्वपि । ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो अध्येयो ज्ञेयश्च । प्रधानं च षट्ष्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति ।** आगम्यते बोध्यते अर्थः (धर्मार्थकाममोक्षरूपः) येन सः आगमः इति । वेदादीनि धर्मशास्त्राणि इत्यर्थः । ब्राह्मणस्य अहेतुकः धर्मः अस्ति यत् सः शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषम् इति षडङ्गसहितस्य वेदस्य अध्ययनं कुर्यात् । यथा हस्तपादादीनि शरीराङ्गानि शररीरस्य साक्षात् उपकारकाणि सन्ति । तद्वत् वेदस्य षड् अङ्गानि वेदस्य उपकारकाणि सन्ति । तत्रापि **मुखं व्याकरणं स्मृतम् इति** । अर्थात् यथा शरीराङ्गेषु मुखस्य स्थानं तद्वत् वेदाङ्गेषु व्याकरणस्य स्थानम् अस्ति । अर्थात् व्याकरणं षट्सु अपि अङ्गेषु प्रधानम् अङ्गम् अस्ति । तथा च प्रधाने कृतः प्रयत्नः फलदः भवति ।

**लघु**

**लघ्वर्थं चाध्येयं व्याकरणम् । ब्राह्मणेनावश्यं शब्दाः ज्ञेया इति । न चान्तरेण व्याकरणेन लघुनोपायेन शब्दाः शक्याः ज्ञातुम् ।** ब्राह्मणेन अवश्यं शब्दाः ज्ञातव्याः शब्दानां च ज्ञानाय व्याकरणं लघुतमः उपायः अस्ति । प्रतिपदं शब्दानां ज्ञानं दीर्घकालसाध्यं बहुपरिश्रमसाध्यं च अस्ति । तेन विधिना शब्दाः ज्ञातुं न शक्यन्ते । अतः लघुना उपायेन शब्दान् ज्ञातुं व्याकरणम् अध्येयम् इति ।

**असन्देहः**

**असन्देहार्थं चाध्येयं व्याकरणम् । याज्ञाकाः पठन्ति – स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति । तस्यां सन्देहः – स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति । तां नावैयाकरणः स्वरतोऽध्यवस्यति । यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः । अथान्तोदात्तत्वं ततस्तत्पुरुषः ।** याज्ञिकाः पठन्ति – स्थूलपृषतीम् आग्निवारुणीम् अनड्वाहीम् आलभेत इति । स्थूलपृषती इत्यत्र सन्देहः भवति, स्थूला चासौ पृषती च स्थूलपृषती, उत स्थूलानि पृषन्ति यस्याः सा स्थूलपषती इति । एतस्य निश्चयं वयं स्वरेण कर्तुं शक्नुमः । यदि पूर्वपदप्रकृतिस्वरत्वम् अस्ति तर्हि बहुव्रीहिः समासः, स्थूलानि पृषन्ति यस्याः सा इति । यदि च अन्तोदातत्त्वम् अस्ति तर्हि तत्पुरुष-समासः, स्थूला चासौ पृषती च भवति । तच्च स्वरज्ञानम् अवैयाकरणः कर्तुं न शक्नोति । अतः सन्देहनिवारणार्थम् अध्येयं व्याकरणम् ।

एतद् अतिरिच्य अन्यानि अपि त्रयोदशप्रयोजनानि भाष्यकारेण उक्तानि – **तेऽसुराः । दुष्टः शब्दः । यदिधीतम् । यस्तु प्रयुङ्क्ते । अविद्वांसः । विभक्तिं कुर्वन्ति । यो वा इमाम् । चत्वारि । उत त्वः । सक्तुमिव । सारस्वतीम् । दशम्यां पुत्रस्य । सुदेवो असि वरुणेति ।**

### तेऽसुराः

**तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः । म्लेच्छा मा भूमेत्यध्येयं व्याकरणम् ।**

**'ते असुराः .....अपशब्दः'** इति कस्यचिद् ब्राह्मणग्रन्थस्य वचनम् अस्ति । हेऽरयो हेऽरयः इति शुद्धप्रयोगः अस्ति । हेलयो हेलयः इति अपप्रयोगः अस्ति । ते असुराः हेलयो हेलयः इति अपप्रयोगं कुर्वन्तः पराजिताः जाताः । तस्माद् ब्राह्मणेन न म्लेच्छ-भाषणं (अव्यक्तभाषणम्) करणीयम् । नापि च अपभाषणं करणीयम् । एषः यः अपशब्दः अस्ति सः म्लेच्छः एव अस्ति । वयं म्लेच्छाः न भवेम इत्येतदर्थं व्याकरणं पठेम ।

### दुष्टः शब्दः

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । सवाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति ॥ दुष्टाञ्शब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् ।**

उदात्तादिभिः स्वैरः वर्णैः च यथावत् अप्रयुक्तः शब्दः तम् अर्थं न कथयति यम् अर्थम् अभिधातुं सः शब्दः उच्चरितः । अपितु सः मिथ्याप्रयुक्तः शब्दः तं यजमानम् एव नाशयति । यथा यज्ञाहुतिकरणसमये 'इन्द्रशत्रुर्विवर्धस्व' इति मन्त्रे स्वरदोषेण वृत्रासुरः मारितः । इन्द्रशत्रुः इत्यत्र अन्तोदात्तस्वरस्य स्थाने पूर्वपदप्रकृतिस्वरं सः प्रयुक्तवान् । अन्तोदात्तस्वरेण इन्द्रस्य शत्रुः (शातयिता) विवर्धस्व इति अर्थः भवति । तथा च पूर्वपदप्रकृतिस्वरेण इन्द्रो यस्य शत्रुः (नाशयिता) विवर्धस्व अर्थात् इन्द्रः विवर्धस्व इत्यर्थः भवति । अतः दुष्टशब्दानां प्रयोगं न कुर्याम इत्येतदर्थं व्याकरणम् अध्येयम् ।

### यदधीतम्

**यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् । तस्मादनर्थकं माधिगीष्महीत्येध्येयं व्याकरणम् ।**

अर्थज्ञानं विना पठनं तथैव अनर्थकम् अस्ति यथा अग्निरहितं शुष्कम् अपि काष्ठं कदापि ज्वलितुं न प्रभवति । तद्वत् अर्थज्ञानं विना पठनम् उच्चारणमात्रं भवति । अर्थज्ञानं च व्याकरणेन भवति । अतः वयम् अनर्थकं न अधीमहे इत्येतदर्थं व्याकरणं पठेम ।

### यस्तु प्रयुङ्क्ते

**यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथा व्यवहारकाले । सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः । कः ? वाग्योगविदेव । कुत एतत् ? यो हि शब्दान् जानात्यपशब्दानप्यसौ जानाति । यथैव हि शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः । अथवा भूयान् अधर्मः प्राप्नोति । भूयांसोऽपशब्दाः अल्पीयांसाः शब्दाः । एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः । यथा – गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः । अथ योऽवाग्योगवित्, अज्ञानं तस्य शरणम् ।**

यः कुशलः प्रकृति-प्रत्ययसंस्कारज्ञः विशेषे व्यवहारकाले यथावत् शब्दप्रयोगान् करोति सः परलोके अनन्तजयं प्राप्नोति । परन्तु वाग्योगविद् अपशब्दैः दुष्यति । यतः यः शब्दान् जानाति सः अपशब्दान् अपि जानाति । यथा शब्दज्ञाने धर्मः तथैव अपशब्दज्ञाने अधर्मः । न केवलम् अधर्मः महान्तम् अधर्मं प्राप्नोति । यतः अपशब्दाः बहवः शब्दाः च अल्पाः एव सन्ति । एकैकस्यापि शब्दस्य अनेके अपभ्रंशाः सन्ति । यथा – गौः इति शब्दस्य गावी गोणी गोता गोपोतलिका इति एवम् अनेके अपभ्रंशाः सन्ति ।

### अविद्वांसः

**अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।**

**कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥**
**अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ।**

प्रवासात् प्रत्यागत्य स्त्रीणाम् अभिवादने अभिवादयेऽहं भोः इति एतावद् एव उच्यते तद्वत् ये मूर्खाः अभिवादनस्य प्रत्युत्तरे नामपदस्य प्लुतोच्चारणं न जानन्ति । तेषां प्रति कामचारितया अयमहमभिवदये इत्येवं प्रयोगं कुर्यात् । इति एवं स्त्रीवद् व्यवहारयोग्याः न भवेम इत्येतदर्थं व्याकरणम् अध्येतव्यम् ।

## विभक्तिं कुर्वन्ति

**याज्ञिकाः पठन्ति – 'प्रयाजाः सविभक्तिकाः कार्याः' इति । न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् ।**

यदा कस्यापि कर्मणः विच्छेदः भवति तदा पुनराधेया इष्टिः क्रियते । तस्याः पुनराधेयेष्ट्याः इतिकर्तव्यताविषये इदं वचनं पठितम् अस्ति । प्रायाजाः नाम यज्ञाङ्गभूताः ताः आहूतयः याः प्रधानयागात् पूर्वं दीयन्ते । तथैव अनुयाजाः नाम ताः आहूतयः याः यज्ञस्य अन्ते प्रदीयन्ते । प्रयाजाः पञ्च भवन्ति । एते पूर्वं सविभक्तिकाः एव पठिताः सन्ति । पुनः विभक्ति-विधानस्य कः अर्थः ? इति चेत् विभक्तयः प्रत्ययाः सन्ति । केवलस्य प्रत्ययस्य प्रयोगासम्भवाभावात् प्रकृतेः आक्षेपः भवति । यतः त्वमग्नेः प्रयाजानां पुरस्तात्त्वं पश्चात् एतादृशं वेदवाक्यम् अस्ति । अतः अग्नि-शब्दः एव अत्र प्रकृतिः स्वीक्रियते तथा च प्रथमा (सम्बुद्धिः), सप्तमी तृतीया द्वितीया एतत्चसृविभक्तियुक्तः पठ्यते । समिधोग्ने आज्यस्य व्येतु इत्यादयः पञ्च मन्त्राः सन्ति । प्रथमेषु चतुर्षु मन्त्रेषु अग्ने अग्ने ,अग्नावग्ने, अग्निना अग्ने, अग्निमग्ने अनेन प्रकारेण एकः अधिकः अग्निशब्दः विभक्तियुक्तः पठ्यते । चतुर्षु प्रयाजेषु चतस्रो विभक्तिर्ददाति नोत्तमे इत्यादिना आपस्तम्ब-वचनानुसारेण अन्तिमे पञ्चमे मन्त्रे अग्नि-शब्दः सविभक्तिकः न दीयते । विना च व्याकरणं एते प्रयाजाः सविभक्तिकाः कर्तुं न शक्यन्ते । अतः व्याकरणम् अध्येतव्यम् ।

## यो वा इमाम्

**यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्त्विजीनो भवति । आर्त्त्विजीनाः स्यामेत्यध्येयं व्याकरणम् ।**

यः निश्चयेन एतां वेदवाणीं पदशः स्वरशः अक्षरशः च संस्करोति । सः आर्त्त्विजीनः अर्थात् ऋत्विक् ऋत्विक्-कर्मणः अधिकारी (याजकः) भवति । वयं ऋत्विक्-कर्मयोग्याः भवेम इत्येतदर्थं व्याकरणम् अध्येतव्यम् ।

## चत्वारि

**'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥' ऋ.सं. ४/५८/०३**

**चत्वारि शृङ्गाणि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः त्रयः कालाः भूतभविष्यद्वर्तमानाः । द्वे शीर्षे – द्वौ शब्दात्मानौ नित्यः कार्यश्च । सप्त हस्तासो अस्य – सप्तविभक्तयः । त्रिधा बद्धः – त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति शब्दं करोति । कुत एतत् ? रौतिः शब्दकर्मा । महोदेवो मर्त्याँ आविवेशेति । महान्देवः शब्दः । मर्त्या मरणधर्माणो मनुष्याः, तानाविवेश । महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।**

चत्वारि अस्य शृङ्गाणि सन्ति । त्रयः पादाः सन्ति । द्वे शिरसी स्तः । सप्त हस्ताः सन्ति । त्रिषु स्थलेषु बद्धः वृषभः बहु शब्दान् करोति । एषः महान् देवः मनुष्येषु प्रविष्टः अस्ति । अस्य यानि चत्वारि शृङ्गाणि कथितानि तानि चतुर्विधानि पदानि सन्ति – नाम, आख्यातानि, उपसर्गाः, निपाताः च । भूतकालः भविष्द्कालः वर्तमानकालः च इति अस्य त्रयः पादाः सन्ति । नित्यः कार्यः (अनित्यः) च इति द्विविधाः शब्दाः अस्य शिरसी स्तः । सप्त विभक्तयः एव अस्य सप्त हस्ताः सन्ति । अयं त्रिषु स्थानेषु उरसा शिरसा कण्ठेन च बद्धः अस्ति । कामनानां वर्षणं करोति इत्यतः वृषभः । रोरवीति इत्यस्य अर्थः अस्ति शब्दं करोति । कथम् इति चेत् रुधातुः शब्दकरणार्थे पठितः अस्ति । महो देवः इत्यादीनाम् अर्थः अस्ति महान् देवरूपः शब्दः मरणस्वभावत्सु मनुष्येषु प्रविष्टः अस्ति । तेन महता देवेन अस्माकं सायुज्यं स्यात् इति एतदर्थं व्यारणं अध्येतव्यम् ।

### उत त्वः

**"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥" उत त्वः अपि खल्वेकः पश्यन्नपि न पश्यति वाचम् । अपि खल्वेकः शृण्वन्नपि न शृणोत्येनाम् इति अविद्वासमाहार्धम् । उतो त्वस्मै तन्वं विसस्रे तनुं विवृणुते । जायेव पत्य उशती सुवासाः । तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते एवं वाग् वाग्विदे स्वात्मानं विवृणुते । वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणम् ।**

एकः एनां वाचं पश्यन् अपि न पश्यति । एकः शृण्वन् अपि एनां न शृणोति । एषः ऋचायाः अर्धभागः अविद्वासं कथयति । तथा च ऋचायाः अर्धभागः कथयति । अपि च एकस्य कृते एषा वाणी स्व-स्वरूपम् तथैव उद्घटयति यथा पतिं कामयमाना सुवस्त्रा पत्नी पत्ये स्वशरीरम् उद्घटयति । अतः वाणी अस्माकं कृते स्व-स्वरूपम् उद्घाटयेत् इत्येतदर्थम् अध्येयं व्याकरणम् ।

### सारस्वतीम्

**याज्ञिकाः पठन्ति – "आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्" इति । प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् ॥**

याज्ञाकाः पठन्ति यत् आहिताग्निः (यः अग्नेः आधानं कृतवान् अस्ति सः) अपशब्दं प्रयुज्य प्रायश्चित्तविषयकं सारस्वतयज्ञं कुर्यात् । वयं प्रायश्चित्तीयाः न भवेम इत्येतदर्थं व्याकरणम् अध्येयम् ।

### दशम्यां पुत्रस्य

**याज्ञिकाः पठन्ति "दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् । तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्" इति । न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम् ॥ दशम्यां पुत्रस्य ॥**

याज्ञिकाः पठन्ति जन्मनः दशमीरात्रेः पश्चात् एकादशे दिने उत्पन्नस्य पुत्रस्य नामाकरणं कुर्यात् । यत् च नाम आदौ घोषवर्णवत् मध्ये अन्तःस्थवर्णवत् तथा च अवृद्धम् (आदौ आ ऐ ए औ इत्यक्षररहितम्) पिता पितामहः प्रपितामहः इति पुरुषत्रयस्य नाम्नः स्मरणं कारयेत् तथा च तत् नाम शत्रोः नाम्ना प्रसिद्धं न स्यात् । एतादृशं नाम एव प्रतिष्ठितं भवति । द्व्यक्षरवद् चतुरक्षरवत् च कृदन्तं नाम विदध्यात् तद्धितान्तं न विदध्यात् । व्याकरणाध्ययनं विना च कृदन्तस्य तद्धितान्तस्य वा बोधः न भवेत् ।

### सुदेवोऽसि

**"सुदेवोसि वरुण यस्य ते सप्त सिन्धवः । अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥" सुदेवो असि वरुण सत्यदेवोऽसि । यस्य ते सप्त सिन्धवः सप्त विभक्तयः । अनुक्षरन्ति काकुदम् । काकुदं तालु । काकुर्जिह्वा, सास्मिन्नुद्यत इति काकुदम् । सूर्म्यं सुषिरामिव । तद्यथा शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति एवं ते सप्त सिन्धवः सप्त विभक्तयस्ताल्वनुक्षरन्ति । तेनासि सत्यदेवः । सत्यदेवाः स्यामेत्यध्येयं व्याकरणम् ।**

हे वरुण! त्वं सुदेवः असि । यस्य कण्ठात् निसृताः सप्त विभक्तयः तालौ प्रवहन्ति । यथा सच्छिद्रायाः शोभनायाः अयःप्रतिमायाः अन्तः अग्निः प्रविश्य मलादिकं ज्वालयति तद्वत् भवतः सप्त विभक्तयः तालुं प्राप्य प्रकाशिताः भवन्ति । अतः वयम् अपि सत्यदेवाः भवेम इत्येतदर्थम् अध्येयं व्याकरणम् ।

एवं महाभाष्यकारेण उक्तं व्याकरणाध्ययनस्य प्रयोजनम् अत्र प्रतिपादितम् । वस्तुतः **काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्** इत्युच्यते । काणादस्य न्यायशास्त्रं पाणिनेः व्याकरणशास्त्रं च सर्वशास्त्राणि उपकरोति इत्यतः वेदशास्त्रं तदुजीव्यानि च स्मृति-पुराण-इतिहास-काव्यादीनि अन्यानि शास्त्राणि अधिगन्तुं व्याकरणाध्ययनम् आवश्यकम् । अत एव भाष्कराचार्येणापि उक्तम् -

**यो वेद वेदवदनं सदनं हि सम्यक्**

**ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम् ॥**
**यस्मादतः प्रथममेदधीत्य धीमान्**
**शास्त्रान्तरेषु भवति श्रवणेऽधिकारी ॥**[3]

यः सरस्वत्याः सदनभूतं वेदस्य प्रधानम् अङ्गं व्याकरणशास्त्रं सम्यक् जानाति सः वेदम् अपि जानाति । अन्येषां शास्त्राणां स्मृति-पुराण-इतिहास-काव्यादीनां तु किं कथनीयम् । अर्थात् वेदज्ञाने सति तानि तु सहजतया ज्ञायन्ते एव । अतः बुद्धिमान् मनुष्यः व्याकरणम् अधिगच्छेत् ।

[3] सिद्धान्तशिरोमणिः गोलाध्या.८